# ०९. श्रीकृष्णाष्टोत्तरशतनामस्तोत्रम्

श्रीकृष्णाष्टोत्तरशतनाम्नां नारायण ऋषिः ।
अनुष्टुप् छंदः । श्री गोपालकृष्णो देवता ।

ओं श्रीकृष्णः कमलानाथो वासुदेवः सनातनः ।
वसुदेवात्मजः पुण्यो लीलामानुषविग्रहः ।१।

श्रीवत्सकौस्तुभधरो यशोदावत्सलो हरिः ।
चतुर्भुजात्तचक्रासिगदाशंखाद्युदायुधः ।२।

देवकीनंदनः श्रीशो नंदगोपप्रियात्मजः ।
यमुनावेगसंहारी बलभद्रप्रियानुजः ।३।

पूतनाजीवितहरः शकटासुरभंजनः ।
नंदव्रजजनानंदः सच्चिदानंदविग्रहः ।४।

नवनीतविलिप्तांगो नवनीतनटोऽनघः ।
नवनीतनवाहारो मुचुकुंदप्रसादकृत् ।५।

षोडशस्त्रीसहस्रेशस्त्रिभंगी मधुराकृतिः ।
शुकवागमृताब्धींदुर्गोविंदो योगिनांपतिः ।६।

वत्सपादहरोऽनंतो धेनुकासुरभंजनः ।
तृणीकृततृणावर्तो यमळार्जुनभंजनः ।७।

उत्तालतालभेत्ता च तमालश्यामळाकृतिः ।
गोपगोपीश्वरो योगी कोटिसूर्यसमप्रभः ।८।

इळापतिः परंज्योतिर्यादवेंद्रो यदूद्वहः ।
वनमाली पीतवासाः पारिजातापहारकः ।९।

गोवर्धनाचलोद्धर्ता गोपालः सर्वपालकः ।
अजो निरंजनः कामजनकः कंजलोचनः ।१०।

मधुहा मथुरानाथो द्वारकानायको बली।
वृंदावनांतःसंचारी तुलसीदामभूषणः।११।

स्यमंतकमणेर्हर्ता नरनारायणात्मकः।
कुब्जागंधानुलिप्तांगो मायी परमपूरुषः।१२।

मुष्टिकासुरचाणूरमल्लयुद्धविशारदः।
संसारवैरी कंसारिर्मुरारिर्नरकांतकः।१३।

अनादिब्रह्मचारी च कृष्णाव्यसनकर्षकः।
शिशुपालशिरच्छेत्ता दुर्योधनकुलांतकः।१४।

विदुराक्रूरवरदो विश्वरूपप्रदर्शकः।
सत्यवाक् सत्यसंकल्पः सत्यभामारतो जयी।१५।

सुभद्रापूर्वजो जिष्णुर्भीष्ममुक्तिप्रदायकः।
जगद्गुरुर्जगन्नाथो वेणुनादविशारदः।१६।

वृषभासुरविध्वंसी बाणासुरकरांतकः।
युधिष्ठिरप्रतिष्ठाता बर्हिबर्हावतंसकः।१७।

पार्थसारथिरव्यक्तो गीतामृतमहोदधिः।
काळीयफणमाणिक्यरंजितश्रीपादांबुजः।१८।

दामोदरो यज्ञभोक्ता दानवेंद्रविनाशनः।
नारयणः परं ब्रह्म पन्नगाशनवाहनः।१९।

जलक्रीडासमासक्तगोपीवस्त्रापहारकः।
पुण्यश्लोकस्तीर्थपादो वेदवेद्यो दयानिधिः।२०।

सर्वतीर्थात्मकः सर्वग्रहरूपी परात्परः।
एवं श्री कृष्णदेवस्य नाम्नामष्टोत्तरं शतम्।२१।

कृष्णेन कृष्णभक्तानां गीतं गीतामृतं पुरा।
स्तोत्रं कृष्णप्रियतमं श्रुतं तस्मान्मया परम्।२२।

कृष्णनामामृतं नाम परमानंदकारणम् ।
ईतिबाधादिदुःखघ्नं परमायुष्यवर्धनं ।२३।

दानं व्रतं तपस्तीर्थं यत्कृतंत्विह जन्मनि ।
जपतां शृण्वतामेतत् कोटिकोटिगुणं भवेत् ।२४।

पुत्रप्रदमपुत्राणामगतीनां गतिप्रदम् ।
धनावहं दरिद्राणां जयेच्छूनां जयावहम् ।२५।

शिशूनां गोकुलानां च पुष्टिदं पूर्णपुण्यदम् ।
बालरोगग्रहादीनां शमनं शांतिमुक्तिदम् ।२६।

समस्तकामदं सद्यः कोटिजन्माघनाशनम् ।
अंते कृष्णस्मरणदं भवतापत्रयापहम् ।२७।

कृष्णाय यादवेंद्राय ज्ञानमुद्राय योगिने ।
नाथाय रुग्मिणीशाय नमो वेदांतवेदिने ।२८।

इमं मंत्रं जपन् देवि व्रजंस्तिष्ठन् दिवानिशि ।
सर्वग्रहानुग्रहभाक् सर्वप्रियतमो नरः ।२९।

पुत्र पौत्रैः परिवृतः सर्वसिद्धिसमृद्धिमान् ।
निर्विश्य भोगानंतेऽपि कृष्णसायुज्यमाप्नुयात् ।३०।

॥इति श्री नारदपंचरात्रे ज्ञानामृतसारे उमामहेश्वरसंवादे धरणीशेषसंवादे
श्रीकृष्णाष्टोत्तर शतनामस्तोत्रम् संपूर्णम् ॥